श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ मेय्विरदमान्मियम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मेय्विरदमान्मियम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

जयतु वरदराजो हस्तिशैलस्स जीयात्
यतिपतिसुवचोभिज्ञातृवर्या जयन्तु।
जयतु च शरणागत्याख्यगत्या सहान्या -
वनमनभिगतानां धीमतां प्रीतिरत्र॥ **1** ॥

अष्टाशास्सप्तवार्धीन् धरणिधरवरान् सप्त लोकान् द्विसप्ता -
प्युत्पाद्य भ्राजमानस्सलिलभवभवो यं हि चक्रेऽश्वमेधम्।
पूतं भोग्यं तदीयं सुरभि हविरुपादातुकामो दयाळुः
प्रादुर्भूतोऽतिमोदात् निखिलसुजनदृग्गोचरस्सन् विभाति॥ **2.1** ॥

तुण्डीरे मण्डलेऽस्मिन् जगति शुचितमे क्षेत्रसत्यव्रताख्ये
देवाधीशस्य तस्य त्वनवधिसुगुणेष्वेकमत्रोल्लिखामः।
कारुण्याख्योऽत्युदारस्स तु जलधरवत् पक्षपातानभिज्ञः
भो भोस्सूक्ष्मार्थविज्ञास्सुधिय ! इह समागत्य लक्ष्यं
लभध्वम्॥ **2.2** ॥

विद्वद्वर्या ! उपैत स्वयममितदयो देवराट् शास्ति सर्वं
कारुण्याम्भोधिरीशोप्युपगतकमलोप्यात्तमच्चित्तवासः।
देवाधीशोऽनुकम्पाकर इति बिरुदैरद्भुतं कीर्त्यमानं
वेलातीतं दयाब्धिं कथमिह वरदं संस्तुथेदं नु भाग्यम् !॥ **3** ॥

सिद्धोपायस्स एवेत्यवगमयितृषु श्रीदयैकाश्रयेषु
    रक्ष्यत्वेनैव गृह्णन् सपदि करिगिरिश्रीधरो नस्तदैव।
मुक्तावभ्यर्थितायां निजपदयुगळीं प्रापयत्येव भूयः
    नैवोत्पत्तिः यदाप्तं शुभकरमखिलं नास्ति नो ह्यात्मभारः॥ **4** ॥

सौरभ्यालयफुल्लपद्मनिवसल्लक्ष्मीप्रियं तं महा -
    निक्षेपं पुरुषोत्तमं निजबलादेवेक्षितुं पद्मजः।
नाशक्नोन्निजनैकमन्तुफलतः दुष्कर्मदोषावलिः
    मोहान्धो व्यरुदच्च बाल इव तच्चन्द्राभिलाषी तदा॥ **5** ॥

संरक्षंश्चतुराननो निजपदं देशं तमेव स्थिरं
    मत्वास्थाय चिरादपेक्ष्य हि पुरा दुर्दम्यपञ्चेन्द्रियैः।
साकं षट् च नियम्य खानि सुमहत् तेपे तपोऽत्यायतं
    किं वाकारि मयेत्यलज्जत भृशं कृत्यं निनिन्दात्मनः॥ **6** ॥

पद्मोद्भूतस्स्वलोके वरतममतितश्चागमाध्यापनाच्च
    स्वान्ते विष्णुं यथा वा स्थिरमकृत तथेचिक्षिषुः प्रोद्यतोऽपि।
नैक्षिष्टास्याथ मूलं निजदुरितमविज्ञाय षड्ढ्सलोकान्
    षड्वीपान् अष्टवर्षाण्यपि जहदसमं सर्वदं भारतं प्रैत्॥ **7** ॥

यात्वा सर्वासु दिक्ष्वप्यतिकठिनतपस्तप्तवत्यब्जयोनौ
    "क्षेत्रं सत्यव्रतं याह्यनुपद" मिति या व्योमवाक् तां निशम्य।
गत्वानन्देन तत्रामरवसतिविधातारमाहूय कारुं
    प्राहैवं "विश्वकर्मन्" ! विरचय रुचिरामुत्तरां वेदिमत्राम्॥ **8** ॥

उत्तमसंयुगभूसदृशैकसमुज्ज्वलचापसुयोजितबाणत -
    आस्त्रबलोद्धतदैत्यशिरोदशकस्तबकप्रविपातबलाधिक।
मन्थनसम्मथनोत्थदधिस्थनवोद्धृतशिक्यगभक्षचणाविह
    हस्तिगिरिर्नतपापसमूलविनाशक ईशकरारिरलङ्कृतिः॥ **9** ॥

हेमप्रत्युप्तरत्नप्रचयसुघटितं शिल्पशास्त्रानुगुण्यात्
संश्लिष्टां दानशौण्डैस्सुगुणनिधिचतुर्वर्णनिष्ठैश्च पूर्णाम्।
देवार्हां दर्शनीयां सहजसुभगसद्वाजिहेषां च काञ्चीं
दृष्ट्वा वेधा अहर्षत् दृढवरणवृतां भूविभूषामिवेद्धाम्॥ **10** ॥

काम्योक्त्याम्नायनिष्ठाः कपटविधिपरा नैव पश्यन्ति विष्णुं
श्रीशं तं पुण्यपुण्यं हयमखमनिभं प्रारभे संदिदृक्षुः।
तामाहूयानय त्वं त्वयि ! सुत ! दयितां मे स्वनामापगायाः
आस्ते यो तप्यमाना तट इति चतुरास्यस्सुतं चादिदेश॥ **11** ॥

हंसतनुरुच्चलितहंसगतिरुन्नतं
हंसवरमास्थितवती हि विधिनायिका।
आप्तचतुरास्यतनुजातवचनार्थिता -
प्यस्त्विदमिति प्रतिवचो न ददती तदा॥ **12.1** ॥

शीघ्रगतिनाटकमिदं त्विति च भामिनी
स्वीयगतिवेगविनिरोधकमहीधरे।
निम्नगतिरूर्ध्वगतिरद्भुतमरुद्गति
श्च्यावितदृषद्विषमभूषु समभूषु च॥ **12.2** ॥

पाटितशिलारहितशैलशिखराणि
तान्युन्नतसमातिपृथुलानि विनिपात्य सा।
पर्वतसुपार्श्वमभिपातितमभूत्स्वतो
वीक्ष्य दिश आप मखभूमिसविधं तदा॥ **12.3** ॥

तादृशनयादिगुणवानज इदं किमि -
त्युत्सवसमागतसुरास्स्थिरपदं गताः।
आमुमुदिरेऽच्युत इमां च शयनाकृतौ
रोद्धुमुपयाति तमवाप विनयान्विता॥ **12.4** ॥

आरब्धे विधिना तदा हयमखे यागे महत्यद्भुतं
तं विध्वंसितुमापगामतिरयावेगापगाख्यावती।
वाग्देवी मृदुलागतातिकुपिता तातोऽथ देवाधिराट्
कारुण्यादभवद्विधा वहिशयः सेतुस्स्वयं रक्षितुम्॥ **13**॥

स्थास्नो रर्च्यस्य भूमौ द्रुहिणमखपरित्राणसर्वोपकर्तुः
कारुण्याब्धौ वगाह्य प्रशमितदुरितं तं वयं सेतुमूर्तिम्।
निध्यायन्तोऽथ चास्मद्दुरितगणयिता चित्रगुप्तस्स्वकोशे
घोराण्येनांसि यानि व्यलिखदिह विमुक्ता हि तैर्मोदितास्स्मः॥ **14**॥

धाता लेशं सुखं तन्महदिव विदधत् व्याप्त मेनोऽपहन्तुं
निस्सीम्ना भक्तिभूम्ना मखमकृत तदा संस्तुतं तस्य वेद्याम्।
हैरण्याद्र्याभयान्यादृशमहिमजुषा पुण्यकोठ्या समेतं
भास्वान्यस्याह्वि दीपोऽभवदिव परमं ज्योतिराविर्बभूव॥ **15**॥

महिमवदिभशैलाधीश्वरो ह्याविरासीत्
दृढतमकरुणार्णोवार्षुकः प्रादुरासीत्।
अतिगहनविसीमाम्नायमौळीड्य आयात्
षडवयवित एको यो महानाविरासीत्॥ **16.1**॥

भवति यदि रमा वाक् यस्तदर्थस्स आयात्
उदित करुणया यश्शास्त्रजातं स आयात्।
विधुतनिजपदानां मोहको माय्युपायात्
परमपदगतेर्यो मार्गदर्शी स आयात्॥ **16.2**॥

सर्वेशो देवराजः करिगिरिकरुणामूर्तिरायान्महात्मा
सौन्दर्योद्वर्षिवर्ष्मा करितुरगरथारूढ आयात् स देवः।
काञ्च्यां अक्ष्णां प्रदाता गतनयननराणां स आयात् परेशः
योऽभीष्टानां वराणां वितरणनिपुणो देवराडाविरासीत्॥ **17.1**॥

भक्तेभ्यो मुक्तिवृष्टिं वितरति जलमुग्वर्ण आयात् स देवः
    नागेन्द्रे “मूलमूले” त्यनुरवति तदुज्जीवकारी स आयात्।
वेद्यां यश्चोत्तरायां वरद उदितवान् ब्रह्मयोगे स आयात्
    सर्वे देवा भजन्ते पदकमलयुगं यस्य चायात् स्वयं सः॥ **17.2** ॥

दिनकरभास्वरमुकुटं
    व्युदितकलानिधिवदनम्।
द्विविधलसत्श्रुतियुगले
    त्वभिपतनोत्सुकमकरौ॥ **18.1** ॥

अतुलदयोन्नतिरमया
    द्युतमणिनायतहृदयम्।
चिदचित उद्भमदुदरं
    जगदभिविक्रमचरणौ॥ **18.2** ॥

दधदतिदुर्गमनिगमैः
    वरिवसितौ करिवरदः।
धुतकरुणाकृतिरिह त -
    न्महिम परं त्वभिविनुमः॥ **18.3** ॥

मरुभुवि तज्जलसृतिव -
    द्विनतनगोपरि नगवत्।
अमतिविनाशकरुचिव -
    त्कमलभवाभिमतफलम्॥ **18.4** ॥

सकलतनुष्वसव इव
    प्रणतनृणामिव च सुधा।
इति कविभिः परिपणितं
    द्रुहिण उदीक्ष्य च मुमुदे॥ **18.5** ॥

विवृत्योक्तं शास्त्रे चिदचिदिति सर्वं सृजसि तत्
    तदन्तर्यामी सन्निवससि तदन्तस्तदधिपः।
सरूपं स्थूलं वा भवतु सकलं सूक्ष्ममपि वा
    तदात्मा तद्देही प्रविलससि तद्दोषरहितः॥ **19.1** ॥

यथा भित्त्याधारं भवति रुचिरं चित्रमखिलं
    तथा बद्धा मुक्ताः परमपदिनोऽप्याश्रयबलाः।
त्रयीमार्गे त्यक्ता अचिदहितरीतीर्निरसितुं
    सदोदारप्रज्ञो महिमपरिपूर्णोऽसि भगवन्॥ **19.2** ॥

सहेतुपरिकल्पनाचतुरजल्पविद्याचणैः
    अचाल्य उरुशक्तिमानतिविचित्रमायानिधिः।
सकापिलकणादसौगतजिनेशवाचोदितं
    श्रिताप्त उपमर्दितुं सदय आत्थ शास्त्रं स्वयम्॥ **19.3** ॥

निदानमुचितं यथाचिति तथात्मवर्गे परः
    हृषीकविषयेषु च प्रथितपञ्चभूतेष्वसि।
दशैककरणेष्वपि प्रलय इन्द्रियागोचरे -
    ष्ववेक्षणविचक्षणो मुनिरहो ! महान् दृश्यसे॥ **19.4** ॥

समग्रसमभावनः सकललोकनिर्वाहकः
    क्रमेण समुपावृतं त्वघभवं भवं शास्ति च।
विचेतनसचेतने जगति वीतदोषस्थितौ
    अनुत्तमयशोनिधिः निरुपमस्समस्ताधिपः॥ **19.5** ॥

कलासु विविधास्वनुत्तमतया विभक्तास्वपि
    समुद्धरणभावनानुगुणसद्गुणानां निधे !।
प्रशस्तनिजकर्मसु त्यजनशेमुषी दुष्करा
    ह्युपायमिममाचरत्स्वतिदयः प्रियस्तुष्यसि॥ **19.6** ॥

उपासकमुपावृतान्यखिलपुण्यपापान्यपि
प्रणाश्य पुनरागमव्यपगमाय सङ्कल्पवान्।
शरीरपतनस्थितौ प्रणमतामनावृत्तिके
प्रवेशकरणक्षमोऽस्यनवबोध्यनाडीपथे॥ 19.7॥

प्रकृत्यनुगुणं ततं निखिलतत्त्व मुन्मूल्य च
भवाम्बुनिधितारकेष्वतिमहाधिकार्यग्रणीः।
वितीर्णफलचिन्तकान् शरणमागतान् आत्मनः
अनुज्झित ! दयाकृते ! वरद ! ते हि दादा वयम्॥ 19.8॥

श्रीभूनीळादिदेवीष्वनुपमसुषुमास्वेजमानेषु षड्सु
ज्ञानादिष्वात्मसाम्येष्वपि कृतपदसेवेषु नित्येषु नित्यम्।
वेदस्तुत्येऽप्रमेये परमपद इते भोगितल्पे स्थितेर्हि
नीलं रत्नं जगत्त्रं करिगिरिशिखरेऽपश्यमुग्रे न मेऽघम्॥ 20॥

पादद्वन्द्वाश्रयैकप्रियविदितदयामूर्तिदेवाधिनेतुः
पार्श्वस्थश्रीधरस्य स्तुतकरटिगिरौ कल्पनं स्थेमधाम्नः।
हंसीभ्यां हंस एकोऽविरहित इव वाश्लिष्ट इत्युद्धृणीम
पार्श्वस्त्रोतस्विनीकं मणिमयमिव वाम्रेडयामाचलेन्द्रम्॥ 21.1॥

संश्लिष्टं तं वशाभ्यामिभमिव च महासुन्दरं ह्यामनाम
जुष्टं छायाप्रभाभ्यां रविमिव सुरुचिं वर्णयामा वियुक्तम्।
वीरुद्भ्यां भासमानं विटपिनमिव संशीतलं संस्तवाम
निर्वैकल्यश्रुतिस्मृत्युपचितमिव तं धर्मसूक्ष्मं फणाम॥ 21.2॥

आकाशादिसमस्तविष्टपमहोद्यानैकमूलोपमः
आम्नायाक्षिकनीनिकेव च दयावर्षेण मेघोपमः।
दृष्टादृष्टत एधितोत्तमगुणात् वाराशिनीकाशितः
मेदिन्याश्शिशिरीकृतेरवनतश्चाम्भोनिभो देवराट्॥ 22.1॥

लोकानां सकलापराधसहनात् सर्वंसहासन्निभः
लोकेऽन्यस्त्सदृशोऽस्य सद्गुणपरामर्शे तु लभ्येत कः।
नान्यस्त्वोपम इत्यसंशयवचः स्यादात्मनात्मैव वे -
त्यामर्शे नहि जाघटीति यदयं सत्यं स्वतो निस्तुलः॥ 22.2 ॥

कुर्वन्तं हंसवाहे प्रगुणितहृदये क्ष्मां खुराघातलक्ष्मां
अर्वन्तं चाददाने ज्वलितमिह वरं यागभूमेध्यवेद्याम्।
प्रादुर्भूतस्त्स नाथः पुर उदितवपुः भोश्चतुश्शीर्ष तुभ्यं
किं वाद्यान्यत् प्रदद्यां वरमुचितमिति प्राह देवाधिराजः॥ 23 ॥

नाथं प्राप्यास्मदीयं कुसुममपचितं तत्पदाब्जेऽर्पयित्वा
पूतं नीरं च दीपं मुखसुरभिवसु प्रेष्ठताम्बूलदानम्।
पानीयं चेक्षुसाराद्युपहितमशनं लड्डुकाद्यं सुभक्ष्यं
दत्वा भूयो जपित्वा तदुभयचरणं ध्यायतेत्यादिदेश॥ 24 ॥

देवानुद्धास्य चान्यान् नियमयितुमलं यश्चतुर्वक्त्र आशु
पारावारोपमं तन्निजदुरितमपोडुं च निर्वर्त्य यज्ञम्।
हस्त्यद्रीशानुमत्या पुनरपि भुवनं स्वीयमागत्य तत्र
योगे कल्पानपाये भगवदभिमुखो ध्यानिष्ठो बभूव॥ 25 ॥

धात्रा साक्षात्कृतोऽसौ वरद इह कृपाकार आद्ये युगेऽभूत्
त्रेतायां भक्तिभूम्ना कृतवरिवसितं तं करीन्द्रं ररक्ष।
वादेष्वत्यन्तदक्षे निरुपमितगुरौ द्वापरेऽपिप्रयच्च
दीप्तोऽनन्तः कलौ स्यात्स्वपदपरिचरो भूष्णुरित्यास्थितोऽत्र॥ 26 ॥

पुण्डरीकजपुराणपुंस्कृते
निर्व्यलीक उदिते महामखे।
देववारिमुचि वार्षुके कृपां
तत्समृद्धमतिसूक्ष्मभक्तितः॥ 27.1 ॥

तोण्डमण्डलगताश्च वैदिकाः
पावनद्रविडवेदवेदिनः।
जीवितास्स्युरिति सत्यवैभवं
प्राक्तनोक्तिमकुटार्य उज्जगौ॥ **27.2** ॥

स्रष्टाशानां दिवस्य त्वनितरगतिकोज्जीवनैकव्रतस्य
धर्तुर्देवाधिराजस्तदितरकरणात् चिन्तयाऽनीक्ष्यतायाः।
सर्वत्र व्यर्थभूमिष्वपि चिरमटनात् सन्निवृत्तोऽतिपुण्यम्
आयादित्येव सत्यव्रतविभवमगायच्च वेदान्तसूरिः॥ **28** ॥

तूप्पुल् श्रीवेङ्कटेशः शुभगुणविभवस्तस्य देवाधिनेतुः
मालाद्यैर्भूषितस्य प्रथितपदयुगं संश्रितोऽनन्यभक्त्या।
क्षेत्रे सत्यव्रताख्ये निधिमिव निहितं तद्गतं वैभवं च
संप्रेक्ष्येमं समग्रं करतलफलवत् प्राह दिव्यप्रबन्धम्॥ **29** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथदेशिकमणिः सत्यव्रतैकाश्रयः
श्रीमद्धस्तिगिरिप्रभावमतुलं गाधाभिरास्वादयत्।
गोपालो निगमान्तलक्ष्मणगुरुप्राच्य्राङ्घ्रिपद्माश्रयः
कर्णाटामरभाषितेन विवृतिं श्लोकांश्च तासां व्यधात्॥

॥ इति मॆय्विरदमान्मियं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥